# lakShmInArAyaNastotram

# લક્ષ્મીનારાયણસ્તોત્રમ્

## Document Information

Text title : lakShmInArAyaNastotram 1

File name : lakShmInArAyaNastotram.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# લક્ષ્મીનારાયણસ્તોત્રમ્

ધ્યાનમ્ ।

ચક્રં વિદ્યાવરઘટગદાદર્પણં પદ્મયુગ્મં
દોર્ભિર્બિભ્રત્સુરુચિરતનું મેઘવિદ્યુન્નિભાભમ્ ।
ગાઢોત્કણ્ઠં વિવશમનિશં પુણ્ડરીકાક્ષલક્ષ્મ્યોઃ
એકીભૂતં વપુરવતુ વઃ પીતકૌશેયકાન્તમ્ ॥ ૧॥

શઙ્ખચક્રગદાપદ્મકુમ્ભાદર્શાબ્જપુસ્તકમ્ ।
બિભ્રતં મેઘચપલવર્ણં લક્ષ્મીહરિં ભજે ॥ ૨॥

વિદ્યુત્પ્રભાશ્લિષ્ટઘનોપમાનૌ
  શુદ્ધાશયે બિમ્બિતસુપ્રકાશૌ ।
ચિત્તે ચિદાભૌ કલયામિ લક્ષ્મી-
  નારાયણૌ સત્ત્વગુણપ્રધાનૌ ॥ ૩॥

સ્તોત્રમ્ ।

લોકોદ્ભવસ્થે મલયેશ્વરાભ્યાં
  શોકોરુદીનસ્થિતિનાશકાભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-
  નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૪॥

સમ્પત્સુખાનન્દવિધાયકાભ્યાં
  ભક્તાવનાનારતદીક્ષિતાભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-
  નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૫॥

દૃષ્ટ્વોપકારે ગુરુતાં ચ પઞ્ચ-
  વિંશાવતારાન્ સરસં દધદ્ભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-

નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૬॥

ક્ષીરામ્બુરાશ્યાદિ વિરાટ્ભવાભ્યાં
નારં સદા પાલયિતું પરાભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-
નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૭॥

દારિદ્ર્યદુઃખસ્થિતિદારકાભ્યાં
દયયૈવ દૂરીકૃતદુર્ગતિભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-
નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૮॥

ભક્તવ્રજાઘૌઘવિદારકાભ્યાં
સ્વીયાશયોદ્ધૂતરજસ્તમોભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-
નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૯॥

રક્તોત્પલાભાભવપુર્ધરાભ્યાં
પદ્મારિશઙ્ખાબ્જગદાધરાભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-
નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૧૦॥

અઙ્ઘ્રિદ્વયાભ્યર્ચકકલ્પકાભ્યાં
મોક્ષપ્રદપ્રાક્તનદમ્પતીભ્યામ્ ।
નિત્યં યુવાભ્યાં નતિરસ્તુ લક્ષ્મી-
નારાયણાભ્યાં જગતઃ પિતૃભ્યામ્ ॥ ૧૧॥

ઇદં તુ યઃ પઠેત્ સ્તોત્રં લક્ષ્મીનારાયણાષ્ટકમ્ ।
ઐહિકામુષ્મિકસુખં ભુક્ત્વા સ લભતેઽમૃતમ્ ૧૨॥

ઇતિ શ્રીકૃષ્ણકૃતં લક્ષ્મીનારાયણાષ્ટકસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*lakShmInArAyaNastotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*